# संस्कृतवार्ता:

**दिनाङ्क :-31.10.2024** **प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री एकता दिवस**

प्रधानमन्त्री अद्य सरदारवल्लभभाईपटेलस्य जन्मदिवसस्य राष्ट्रिय-एकता-दिवसोत्सवे भागं भजिष्यति। प्रधानमन्त्री एकतानगरस्य एकताप्रतिमायां सरदारवल्लभभाई पटेलं प्रति श्रद्धाकुसुमानि अर्पयिष्यति तथा च एकता दिवसप्रतिज्ञां अपि प्रदास्यति। श्रीमोदी एकता दिवसस्योपलक्षे पथसञ्चलनस्य अपि साक्षी भविष्यति।

**प्रधानमन्त्री-रक्षा-लेख**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् वडोदरानगरे सी-पञ्चनवत्यधिक द्विशतं इत्यस्य विमाननिर्माणसङ्कुलस्य उद्घाटनं भारतस्य रक्षा-वायु-अन्तरिक्ष-यात्रायाः महत्वपूर्ण-क्षणम् अस्ति। सामाजिकसञ्जालियपटले लिङ्क्डइन इत्यत्र स्वस्य लेखे श्रीमोदी अवदत् यत् आधारशिला स्थपनात् परिचालनपर्यन्तं निष्पादनस्य गतिः तीव्रं आसीत्- केवलं वर्षद्वये एव।

**प्रधानमन्त्री एकतानगरे**

प्रधानमन्त्री नरेन्द्रमोदी गतसायं एकतानगरे अशीत्यधिक द्विशतकोटिरूप्यकाणां विविधमूलसंरचनात्मकविकासपरियोजनानां उद्घाटनं शिलान्यासं च कृतवान्। प्रधानमन्त्रिणा बोनसाई उद्यानस्य, सीवेज ट्रीटमेन्ट सन्यन्त्रस्य, सरदार उप मण्डलीय चिकित्सालस्य च उद्घाटनं कृतम् । ह्यः समारब्धाः परियोजनाः पर्यटकानाम् अनुभवं वर्धयितुं, सुलभतां प्रदातुम्, क्षेत्रे स्थायित्वउपक्रमानाम् समर्थनं कर्तुं च उद्दिश्यन्ते। गुजरातस्य द्विदिवसीय यात्रायां प्रधानमन्त्री आरम्भ-षड् दशमलव शून्यं इत्यस्य नवनवति तमे सामान्यप्रतिष्ठानपाठ्यक्रमस्य अधिकारीप्रशिशून् अपि सम्बोधितवान्। अस्मिन् भारतस्य षोडश-लोकसेवाभ्यः त्रिपञ्चशदधिक षट्शतं अधिकारीप्रशिशवः भूटानस्य त्रीणि लोकसेवाभ्यः च सम्मिलिता: सन्ति ।

**झारखण्ड-निर्वाचनम्**

झारखण्ड-राज्ये विधानसभानिर्वाचनस्य द्वितीय-चरणस्य नामाङ्कनपत्राणां परीक्षणम् ह्य: सम्पन्नम्। अस्य चरणस्य कृते चतुस्त्रिंशदधिक-षट्शतं अभ्यर्थिनः नामाङ्कनं कृतवन्तः। द्वितीये चरणे नवेम्बरमासस्य विंशति-दिनाङ्के अष्टत्रिंशत्-निर्वाचनक्षेत्रेषु मतदानं भविष्यति। अभ्यर्थिनः अद्य यावत् नामाङ्कनं निराकर्तुं शक्नुवन्ति। प्रथमस्य चरणस्य निर्वाचनस्य प्रत्याशि-प्रत्याहर-प्रक्रिया ह्य: समाप्ता। त्रिचत्वारिंशदधिक-सप्तशतं प्रत्याशिनः स्पर्धायां सन्ति। नवम्बर्-मासस्य त्रयोदश-दिनाङ्के प्रथम-चरणस्य निर्वाचने त्रिचत्वारिंशत् निर्वाचनक्षेत्रेषु मतदानं त्रयोविंशति दिनाङ्के च मतानां गणना भविष्यति।

**दीपवलीपर्वोल्लासः**

उत्तरप्रदेशे, अयोध्यायां गतसायं दीपावल्याः पूर्वसन्ध्यायां भव्यः दीपोत्सवः आयोजित: । राममन्दिरस्य अभिषेकसमारोहस्य अनन्तरं अयोध्यायां एषः प्रथमः दीपोत्सवः आसीत्। उत्तरप्रदेश-सर्वकारः राम-की-पैडीं समेत्य अयोध्यायाः पञ्चपञ्चाशत् घाट-स्थलेषु पञ्चविंशति-लक्षाधिकानि दीपानि प्रज्वाल्य **सप्तमं गिन्निस्-वर्ल्ड्-रिकार्ड** इत्यस्य लक्ष्यं कृतवान्। केन्द्रीय-संस्कृति-पर्यटन-मन्त्री गजेन्द्र-सिंह-शेखावतः, मुख्यमन्त्री योगी-आदित्यनाथः, अन्ये च अनेके मन्त्रिणः अस्मिन् कार्यक्रमे भागम् भजितवन्त: । दीपावल्याः अवसरे राजस्थाने अपि विविधानां गतिविधीनां कोलाहलं प्रचलति। ह्य: सम्पूर्णे राज्ये रूपचतुर्दशी आमानित:। भक्ताः विभिन्नेषु पवित्रस्थानेषु जलाशयेषु तडागेषु च पवित्रं निमज्जनं कृत्वा धनस्य समृद्धेः च प्रार्थनां कृतवन्त:। पारम्परिकाः रङ्गोली-मन्डनाः च अनेकेषु स्थानेषु आकर्षणस्य केन्द्राणि सन्ति।

**॥इति वार्ता:॥**